# ज्योतिषशास्त्रस्य प्रभेदः

डॉ. सीमा शर्मा

वेदाङ्गेषु चक्षुस्वरूपस्य निर्मलज्योतिषशास्त्रस्यानेकभेदयुक्तस्य त्रयः प्रधानभेदाः- सिद्धान्त-संहिता-होराख्यप्रमुखैः सर्वैः पूर्वाचार्यैः वर्गीकृताः। केषान आचार्याणां मतानुसारेण प्रश्न-रमलेति स्कन्धद्वयं स्वीकृत्य प प्रभेदा तैः कृता। परं स्कन्धत्रये न विद्यते कस्यापि प्रतिपत्तिः।

नारदेनापि -

**''सिद्धान्तसंहिताहोरारूपं स्कन्धत्रयात्मकं।**

**वेदस्य निर्मलं चक्षुः ज्यातिः शास्त्रमकल्मषम्।।''**

प्रथमः सिद्धान्तः भागः

**''स्कन्धं त्रयात्मकं शास्त्रमाद्यं सिद्धान्तसंज्ञितम्।**

**द्वितीयं जातकं स्कन्धं तृतीयं संहिताह्वयम्।।**

इदानीं प्रतिपादितानां त्रयाणामपि स्कन्धानां संक्षिप्तपरिचयः समुपस्थाप्यते। तत्र सिद्धान्तस्कन्धस्यापरनाम्नः गणितस्कन्धस्य लक्षणं भास्करानुसारम् -

**''त्रुट्यादिप्रलयान्तकालकलना मानप्रभेदश्च क्रमात्**

**चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः।**

**भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते**

**सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे वुधैः।।**

अर्थात् सृष्ट्यादितः प्रलयान्तकालं यावत् ग्रहनक्षत्रादीनां गणनाकाल उत्तरसहितं प्रश्नाः। ग्रहाणां गतिविषयप्रतिपादितम् व्यक्ताव्यक्तात्मकं गणितम्। भूश्च धिष्ण्यानि च ग्रहाश्च तेषां या संस्थितिस्तथा कथनं निरूपणम्। यन्त्रादिकालज्ञानसाधनभूतं प्रसिद्धम्। अर्थात् सिद्धान्ते कालमाननिरूपणम्, अहर्गणानयनम्, वेधगणिताभ्यां ग्रहस्फुटीकरणम्, दिग्देशकालज्ञानोपायनिरूपणम्, तथा कतिपयतन्त्रकरणव्यक्ताव्यक्त-चापज्याक्षेत्रगणितविषयाश्च विराजन्ते।

**द्वितीय: संहिता स्कन्ध:**

नैकविधविश्वाभिप्रायिक-सिद्धान्तानां निरूपकत्वेन संहितास्कन्धस्यानेके प्रभेदा: भवन्ति। तेषु प्रमुखा: भेदा: यथा-

1. सौरमण्डलीयप्रभाव:
2. नाभसप्रभाव:
3. धूमकेतूनां प्रभाव:
4. भूगोलीयप्रभाव: भूकम्पादयश्च।

त्रिगोलीयप्रभावा: - भूसंस्थानानुरोधेन सर्वविधोत्पाता: शुभाशुभलक्षणानि घटनाचक्राणि कार्यभाव - कारणस्वरूपाणि। दिग्देशकालाभिप्रायकभेद: ग्रहार्क्षाणि चात्र परस्पर: सापेक्षिकत्वात् विविच्यन्ते।

वास्तुविद्या - वास्तुस्थापत्यं वास्तुशिल्पं च।

स्वरविद्या - पस्वराणां साहाय्येन शुभाशुभसमयस्य निरूपणम्।

स्वप्नविद्या - स्वप्नानुरोधेन शुभाशुभफलविचार:, दिनमासानुरोधेन तथा जन्मान्तरगतविविधसम्बन्ध:, मन्त्रा: शास्त्रीयप्रयोगाश्च।

शकुनविद्या - भूपृष्ठस्थ दृश्य तात्कालिकशुभाशुभलक्षणानुरोधेनास्य विचार: भवति।

गोचरविद्या - ग्रहगोचरीयशुभाशुभ-विश्वाभिप्रायिकप्रभावनिरूपकस्तात्कालिकविचार:।

अर्घविद्या - वस्तुसमर्घममहार्घयो: विचार:।

भूगर्भविद्या - भूमे: गर्भस्थानां वस्तु: पदार्थादीनां च विचार:। नवीनपरीक्षणेन अस्या: शाखाया: बहव: विभागा: सभता:।

दकार्गलविद्या - भूगर्भान्ते जलस्य स्थितिस्तस्य विचारविमर्श:।

शान्तिविद्या - शुभाशुभोत्पातशमनार्थं निदानात्मकं शास्त्रम्।

वृष्टिविद्या - मौसमविज्ञानं, ऋतुविज्ञानं, वातावरणविज्ञानं, मेघविचार:, जलीयचक्रं, वृष्टे:, कृषिगतसम्बन्धादिविविधसम्बन्धितविषया: विविच्यन्ते। अत्रापि त्रिगोलीयसम्बन्ध: एव मुख्य:।

सामुद्रिकविद्या - सर्वाङ्गशरीरलक्षणविधायकं शास्त्रम्।

अङ्गविद्या - अङ्गस्फुरणं तस्यानुसारं प्रकृतिविकृतय: तस्या: शुभाशुभफलानां वर्णनम्।

पल्लीपतनविचार:-पल्लया: अङ्गविशेषेषु पतने शुभाशुभनिरूपणजन्यशास्त्रम्।

एवमेव ज्योतिषशास्त्रस्य संहितास्कन्धस्य अनेके विभागा: भवन्ति। प्रख्यातज्योतिर्विदुष: वराहमिहिरस्य समये उपर्युक्त सर्वविधा: विद्याशाखा: प्रयोगान्तर्गता आसन्।

**तृतीय: होरास्कन्ध:**

होराशास्त्रेऽपि राशिहोराद्रेष्काणनवांशकद्वादशभागत्रिंशद्भाग बलाबलपरिग्रहो ग्रहाणां दिक्स्थानकालचेष्टाभिरनेकप्रकारबलनिर्धारणं प्रकृति धातुद्रव्यजातिचेष्टादिपरिग्रहो निषेकजन्मकाल विस्मापनप्रत्ययादेशं सद्यो मरणायुर्दायं दशान्तदशाष्टकवर्गराजयोगचन्द्रयोग द्विग्रहादियोगानां नाभसादीनां च योगानां फलान्याश्रय भावालोक निर्याणगत्यनुकानि तत्कालप्रश्नशुभाशुभनिमित्तानि विवाहदीनां च कर्मणां करणम्। एवमेव व्यक्तेरभिप्रायिक सर्वविधविचार: होराग्रन्थे समुपलभ्यते भारतीयज्योतिषे सामुद्रिकशास्त्रस्य एवं सामुद्रिकशास्त्रे हस्तसञ्जीवनस्य स्थानम् 'समुद्रेण प्रोक्तमिदं सामुद्रिकम्' समुदऋषिणा प्रणीतं यत् तत् सामुद्रिकमित्युच्यते। स्त्रीपुंशरीरलक्षणशास्त्रमस्यार्थ:। सामुद्रिकशास्त्रे नखत: शिखापर्यन्तं सपादमस्तिष्कशरीस्याङ्गोपाङ्गानां विस्तृतं विवेचनमस्ति।

मुख्यतया हस्तं संस्पृश्य दृष्ट्वा विमृश्य च कृतफलादेशं सटीकं भवति। अनेनैव कारणेन प्राचीनाधुनिकाचार्यै: मनीषिभिश्च सामुद्रिकशास्त्रान्तर्गतहस्तशास्त्रं सर्वाङ्गचिन्तनं प्रस्तुतम्। हस्तरेखाविज्ञानं भारतीयानामनुपमविज्ञानमासीत्। 'हस्तसञ्जीवनम्' ग्रन्थमस्यैव एकमुदाहरणमस्ति। विषयेऽस्मिन् तिलकमहोदयेन कथितम्।

"I can sofly say that palmistiry can be relied upon as much if not more than astrology."

हस्तरेखाविज्ञानसम्बद्धा: अनेके ग्रन्था: सन्ति किन्तु हस्तेन सम्पूर्णफलादेशस्य क्रियाप्रतिक्रियास्ति ग्रन्थेऽस्मिन्। श्रीमेघविजयगणिकृत 'हस्तसञ्जीवनम्' भारतीयाङ्गविद्यासु प्रतिनिधि: सामुद्रिकविद्यायानुपमग्रन्थोऽस्ति। इदं प्राचीनमौलिकग्रन्थेष्वग्रणी ग्रन्थम्। विभिन्नसिद्धान्तं पद्धतीश्च प्रमाणयति। हस्तं दृष्ट्वा जन्मपत्रनिर्माणं, हस्तेनैव वर्षकुण्डली-मासकुण्डली-तिथिकुण्डली च निर्माणं तथा दिनदशायारपि सूक्ष्मातिसूक्ष्मज्ञानं भवति। हस्तं संस्पृश्य दृष्ट्वापि मूकप्रश्ननिर्णयानां सूक्ष्मविवेचनं कर्त्तुं शक्यते। अयमेव अस्याकर्षणमस्ति। ग्रन्थेऽस्मिन् पविंशत्युत्तरपशतश्लोका: सन्ति। तस्यैव हस्तरेखाविज्ञानस्यावयवभूतोऽयं ग्रन्थ: संक्षिप्तोऽपि सर्वाङ्गपूर्ण:, स्त्रीपुंसयोरनुशीलने महत्वशाली वर्तते।

जगदिदं परिवर्तनशीलं वर्तते वर्तमाने शिक्षा-विवाह-व्यवसाय-रोगादिविभिन्नस्थानेषु परिवर्तनानि

जायन्ते। अनेनैव कारणेन प्राचीनग्रन्थेषु यत् वर्णितं फलादेशं तत्तु आधुनिके नोचितम्। तत् प्राचीनभारतीयपद्धतिविचारस्थितीनां अनुसारेणैवोपयोगी भवति।

प्राचीनकालस्य ग्रन्थेऽस्मिन् सर्वे विषया: समाहिता: सन्ति। तथापि अद्य केचन ईदृशा: विषया: येषां प्रयोग: प्राचीनकाले न क्रियते स्म। यथा -

यदि हस्ते राजयोगस्य चिह्नानि स्यु: तर्हि पुरा अस्यार्थ: राजेति भवति स्म, परन्तु अधुना राजयोगस्य किं फलं वक्तव्यम्? राजा वा धनवान् वा सर्वकारस्य प्रशासनस्य जनो वा, इति विचारणीयमस्ति।

हस्ते विद्यारेखा त्वस्ति, परन्तु स: जातक: कस्मिन् क्षेत्रे विद्यां प्राप्स्यति - अभियान्त्रिके चिकित्सायां शिक्षायां वा अयमाधुनिककालस्य मुख्यप्रश्न:?

पुरा मनुष्यास्यायु: शतवर्षाणि भवन्ति स्म। अद्य शतवर्षाणि प्राय: कस्यचिदपि नरस्य न भवति। तदा आयुप्रमाणं केन प्रकारेण निर्णीतं स्यात्।

तर्जनीमूले रेखा संन्यासरेखेति, पुरा तु ऋषिमहर्षय: संन्यासं गृह्णन्ति स्म, वनं गत्वा तपन्ति स्म। अद्य अस्य संन्यासस्य कोऽर्थ:?

ज्यौतिषशास्त्रे सर्वप्रकारेण मृत्युविषये विवरणमस्ति। यथा जलेन शस्त्रेण अग्निना ज्वरेण, परन्तु अधुना प्रचलितात्माघातविषये योगबोधकानि शास्त्राणि न्यूनानि सन्ति।

हस्ते वाहनरेखा स्यात्, तर्हि अश्व- पालकीरथपूर्ण: जन: इति कथ्यन्ते, अद्य कीदृश्या वाहनरेखया जातक: केन यानेन कारयानेन विमानेन युतो वा भविष्यति।

प्राचीने तु ग्रन्थोऽयं सटीक: आसीत्। किन्तु आधुनिके अस्मिन् ग्रन्थे वर्णितं फलादेशं केन प्रकारेण उपयुक्तं स्यात्। अत एव 'हस्तसञ्जीवनस्य' आधुनिकपरिप्रेक्ष्ये उपयोगितास्ति न वा।

हस्तरेखाद्वारा फलादेशस्य वैज्ञानिक पक्ष:

प्राचीनसर्वहस्तरेखाग्रन्थेषु कृतफलादेशं तत् समयानुसारमुचितं भवति स्म। अद्य वैज्ञानिके युगे बहुनि वस्तूनि परिवर्तनानि, विभिन्नरोगा: - प्रकृतिकृतकार्या: - शिक्षा-सामान्यजीवनेत्यादय:-

अत एव वैज्ञानिकपक्षस्य ज्ञानं परममावश्यकं वर्तते। आधुनिकहस्तरेखाविद: नोवेल जेक्यून-बेन्हम-लॉरी रीड-एन आल्टमेना: चादय: सिद्ध्यन्ति यत् हस्तरेखाभि: जातकस्य चरित्रस्वभावमानसिकस्थिति-स्वास्थ्यविषयेभ्य: पृथक् कैसंरहृदयाघातपक्षाघातमोतियाबिन्दश्चेत्यादीन् विभिन्नगम्भीररोगान् ज्ञायन्ते।

भारतीयज्यौतिषेन: सिद्धम् ग्रहाणां स्पष्टप्रभावं मानवजीवने भवति। यथा - चन्द्रमस: वृद्धिक्षीणत्वात् समुद्रे ज्वारभाटा-उत्पत्ति: अर्थात् अस्य जलेन सम्बन्ध:। विभिन्नवैज्ञानिकाध्ययनै: सिद्धम्-पूर्णचन्द्ररात्रिषु

घातमात्मघातं वाधिकं जायते। यतोहि चन्द्रमसि परिवर्तने सति मानवशरीरस्य जले रक्ते वा परिवर्तनेन धनात्मकं ऋणात्मक प्रभावो भवति।

वर्तमानप्रचलितारोगानां कृते एक्यूप्रेशरप्राकृतिकचिकित्सापद्धतिः सुजोकचिकित्सापद्धतिः प्रचलिताः। एतासु हस्तपादेषु विभिन्नबिन्दुषु प्रभावं संपात्य रोगानामुपचारः क्रियते। बिन्दूनां दबावेन रक्तसारः उचितः भवति येन शरीरे स्फूर्तिशक्त्यादिषु वृद्धिमागच्छति।

जापानदेशे (shiatsu) कथ्यते। (shi) अगुलयः, (atsu) दबावः। हस्ताङ्गुलिषु दबावैरेवेयं पद्धतिः। अमेरिका-कनाडा-जर्मनी-चीनादिदेशेषु बहुप्रचलिता। सर्वशरीरस्य शारीरिकमानसिकविभिन्नरोगानामुपाचारः हस्तपादमाध्यमेन कथं किमर्थ करोति अस्य वैज्ञानिकाधारः वर्तते। तत्र रक्तवाहिकानां स्नायुसंस्थानाना समस्तसूक्ष्मदीर्घनाडीनामन्तिमभागाः हस्तपादेष्वेव भवन्ति।

*संस्कृत शिक्षिका, दिल्ली सरकार*